**Nepal Sanskrit University** **[P.S.]**

# प्राक्शास्त्री

## २०७८

पूर्णाङ्काः - १००

विषयः :- ऐ. संस्कृत व्याकरणम् उत्तीर्णाङ्काः - ४०

पत्रम् :- तृतीयम् समयः - घण्टात्रयम्

---

### खण्ड-क

**समीचीनोत्तरस्य प्रकोष्ठे ☑ संकेतो देयः –** २०×१ = २०

१. माहेश्वरसूत्रेषु दशमसूत्रं किमस्ति ?
(क) झभञ् ☐ (ख) घढधष् ☐
(ग) जबगडदश् ☐ (घ) कपय् ☐

२. कश्चाभ्यन्तरप्रयत्नो नास्ति ?
(क) स्पृष्टः ☐ (ख) विवृतः ☐ (ग) श्वासः ☐ (घ) संवृतः ☐

३. टवर्गस्य किं स्थानं भवति ?
(क) मूर्धा ☐ (ख) दन्ताः ☐ (ग) तालु ☐ (घ) कण्ठः ☐

४. सच्चित् अत्र कः सन्धिर्भवति ?
(क) श्चुत्व ☐ (ख) ष्टुत्व ☐ (ग) कुत्व ☐ (घ) जश्त्व ☐

५. बहुश्रेयसीशब्दस्य द्वितीयाबहुवचने कीदृशं रूपं भवति ?
(क) बहुश्रेयसीन् ☐ (ख) बहुश्रेयसीम् ☐
(ग) बहुश्रेयस्यः ☐ (घ) बहुश्रेयस्यौ ☐

६. कस्य शब्दस्य नदीसंज्ञा भवति ?
(क) ज्ञान ☐ (ख) श्रीपा ☐ (ग) गौरी ☐ (घ) रमा ☐

७. सर्वशब्दस्य चतुर्थ्येकवचने किं रूपं भवति ?
(क) सर्वस्मै ☐ (ख) सर्वस्य ☐ (ग) सर्वस्मात् ☐ (घ) सर्वे ☐

८. वारिणि इदं रूपं कस्यां विभक्तौ भवति ?
(क) ङसि ☐ (ख) ङस् ☐ (ग) ङि ☐ (घ) ङे ☐

९. घेर्ङिति इति सूत्रस्य उदाहरणं किम् ?
(क) रामाय ☐ (ख) हरये ☐ (ग) रमायै ☐ (घ) सर्वस्मै ☐

१०. 'इकोऽचि विभक्तौ' अनेन सूत्रेण किं करोति ?
(क) नुमागमः ☐ (ख) नुडागमः ☐
(ग) अनुस्वारः ☐ (घ) परसवर्णः ☐

११ निशा शब्दस्य कोऽर्थः ?
(क) रात्रि ☐ (ख) दिवा ☐ (ग) सायम् ☐ (घ) प्रातः ☐

क्रमशः

१२. 'द्विगोः' अस्य सूत्रस्योदाहरणं किमस्ति ?
(क) गौरी ☐ (ख) गोपी ☐ (घ) त्रिलोकी ☐ (ङ) लक्ष्मीः ☐

१३. 'वयसि प्रथमे' सूत्रस्योदाहरणं किमस्ति ?
(क) रोहिणी ☐ (ख) कुमारी ☐ (ग) त्रिलोकी ☐ (घ) नारी ☐

१४. 'अकथितं च' अस्य सूत्रस्योदाहरणं किमस्ति ?
(क) गां दोग्धि पयः ☐ (ख) विप्राय गां ददाति ☐
(ग) मोक्षे इच्छास्ति ☐ (घ) ग्रामादायाति ☐

१५. 'हरिं भजति' अत्र का विभक्तिर्भवति ?
(क) तृतीया ☐ (ख) चतुर्थी ☐ (ग) द्वितीया ☐ (घ) सप्तमी ☐

१६. 'मुनित्रयम् नमस्कृत्य' अत्र का विभक्तिर्बलीयसी ?
(क) कारकविभक्तिः ☐ (ख) उपपदविभक्तिः ☐
(ग) चतुर्थीविभक्तिः ☐ (घ) सप्तमीविभक्तिः ☐

१७. 'उपकृष्णम्' अत्र अलौकिकविग्रहः कीदृशो भवति ?
(क) कृष्ण ङि उप ☐ (ख) कृष्ण ङस् उप ☐
(ग) कृष्ण ङसि उप ☐ (घ) कृष्ण ङे उप ☐

१८. 'सप्तमी शौण्डैः' अस्य सूत्रस्योदाहरणं किमस्ति ?
(क) पञ्चगवम् ☐ (ख) अक्षशौण्डः ☐ (ग) अधिगोपम् ☐ (घ) राजपुरुषः ☐

१९. 'नीलोत्पलम्' अत्र कः समासो भवति ?
(क) द्विगुः ☐ (ख) द्वन्द्वः ☐ (ग) कर्मधारयः ☐ (घ) बहुब्रीहिः ☐

२०. 'हरिहरौ' अत्र कः समासो भवति ?
(क) तत्पुरुषः ☐ (ख) अव्ययीभावः ☐ (ग) द्वन्द्वः ☐ (घ) बहुब्रीहिः ☐

–: ० :–

**Nepal Sanskrit University** **[P.S.]**

# प्राक्शास्त्री

## २०७८

पूर्णाङ्काः - १००

विषयः :- ऐ. संस्कृतव्याकरणम् उत्तीर्णाङ्काः - ४०

पत्रम् :- तृतीयम् समयः - घण्टात्रयम्

**(क) परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैश्शब्दैर्लेखनीयम् ।**

**(ख) दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ॥**

### खण्ड-ख

चतुर्दश प्रश्नाः समाधेयाः – १४×४ = ५६

१. य, श वर्णयोराभ्यन्तरप्रयत्नं लिखित्वा 'तुल्यास्यप्रयत्नं सवर्णम्' अस्य सूत्रस्यार्थं लिखत ।

अथवा

मुनित्रयं......., इति पद्यं पूरयित्वा तत्स्यार्थं लिखत ।

२. संहिता-गुण-पद-गतिसंज्ञाविधायकानि सूत्राणि लिखत ।

३. रामैः, हरौ, सर्वस्मै एषु द्वौ प्रयोगौ साधयत ।

४. 'कृत्तद्धितसमासाश्च' अस्य सूत्रस्यार्थं लिखत ।

अथवा

विश्वपा शब्दस्य सर्वाणि रूपाणि लिखत ।

५. प्रातः, पुनः, ऋते, शनैः एषाम् अव्ययशब्दानाम् अर्थान् लिखत ।

६. 'अजाद्यतष्टाप्' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

अथवा

टिड्ढाणञ्......' इदं सूत्रं पूरयित्वा एकमुदाहरणञ्च लिखत ।

७. 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

८. हरिं भजति, विप्राय गां ददाति, कटे आस्ते एषु द्वयोः कारकप्रक्रियां दर्शयत ।

९. 'साधकतमं करणम्' 'ध्रुवमपायेऽपादानम्' अनयोः सूत्रयोरर्थं लिखत ।

१०. अधस्तनशब्दानां लौकिकविग्रहं दर्शयत–

(क) अधिहरि (ख) हरित्रातः

(ग) गोरक्षितम् (घ) चोरभयम्

११. अधस्तनशब्दानां समस्तरूपाणि लिखत–

(क) कृष्ण ङस् उप (ख) कृष्ण अम् श्रित सु

(ग) शङ्कुला टा खण्ड सु (घ) अक्ष सुप् शौण्ड सु

क्रमशः

१२. 'अब्राह्मणम्' इति प्रयोगं संसाध्य 'अनेकमन्यपदार्थे' अस्य सूत्रस्यार्थं लिखत ।

१३. वाक् च त्वक् च अस्य समस्तरूपं विलिख्य 'चार्थे द्वन्द्वः' अस्य सूत्रस्यार्थं लिखत ।

१४. 'विशेषणं विशेष्येण बहुलम्' अस्य सूत्रस्यार्थं विलिख्य 'कृष्णसर्पः' इति प्रयोगं साधयत ।

अथवा

शिवकेशवौ, कण्ठेकालः, निष्कौशाम्बिः, चित्रगुः एषां शब्दानां लौकिक विग्रहं दर्शयत ।

### खण्ड-ग

त्रयः प्रश्नाः समाधेया – ३×८ = २४

१५. लाकृतिः, हरेऽव, रामष्षष्ठः, मनोरथः, तल्लयः एषु चतुरः प्रयोगान् प्रमुखसूत्रनिर्देशपूर्वकं साधयत ।

अथवा

उपेन्द्रः, देवैश्वर्यम्, विश्ववाहः, द्यौः, यूनः एषु चतुरः प्रयोगान् प्रमुखसूत्रनिर्देशपूर्वकं साधयत ।

१६. दध्ना, पन्थानौ, तस्मात्, अहन्, आपः एषु चतुरः प्रयोगान् साधयत ।

१७. समासलक्षणं लिखत ।

अथवा

'अव्ययं विभक्ति.....' इतिसूत्रं पूरयित्वा कस्याप्येकस्य सविग्रहमुदाहरणं लिखत ।

–: ० :–